सम्पूर्णकुम्भो न करोति शब्दं
अर्धो घटो घोषमुपैति नूनम् ।
विद्वान् कुलीनो न करोति गर्वं
जल्पन्ति मूढास्तु गुणैर्विहीनाः ॥

पदच्छेदः - सम्पूर्णः कुम्भः न करोति शब्दम् । अर्धः घटः घोषम् उपैति नूनम् । विद्वान् कुलीनः न करोति गर्वम् । जल्पन्ति मूढाः तु गुणैः विहीनाः ॥

अन्वयः - सम्पूर्णः कुम्भः शब्दं न करोति । अर्धः घटः नूनं घोषम् उपैति । कुलीनः विद्वान् गर्वं न करोति । गुणैः विहीनाः मूढाः तु जल्पन्ति ॥

अर्थः - कुम्भः, घटः यदा जलपूर्णः भवति, जलेन पूर्णः तिष्ठति, तदा शब्दं न करोति । किन्तु यदा रिक्तः भवति, शून्यः भवति, जलहीनः भवति, तदा शब्दं करोति । अर्धः घटः घोषम् उपैति नूनम्। अर्थात् यदा घटः रिक्तः भवति अथवा अर्धं जलपूर्णं भवति अर्धं च रिक्तं भवति तदा नूनम् अवश्यम् घोषं शब्दम् नादम् उपैति । नादं गच्छति । नादं करोति इत्यर्थः । अर्धः जलपूर्णः घटः शब्दं अवश्यं करोति । यदि सम्पूर्णः अर्थात् जलेन सम्यक् पूर्णः भवति तदा शब्दं न करोति ।

तथैव विद्वान्, ज्ञानी, पण्डितः, शास्त्रज्ञः वा जनः कुलीनः च अर्थात् उच्चवंशीयः, यः एकस्मिन् उच्चकुले जायते, यस्य जन्म उच्चवंशे भवति सः जनः । कश्चित् ज्ञानी उच्चवंशीयः च जनः गर्वं न करोति । मानम् अभिमानं आत्माभिमानं वा न करोति । किन्तु कश्चित् मूढः मूर्खः गुणैः हीनः विहीनः रहितः जनः अर्थात् गुणहीनः गुणरहितः गुणशून्यः जनः जल्पति सर्वदा निरर्थकं वदति । कार्यहीनं कारणेन विना वदति इत्यर्थः । एतस्मिन् सुभाषिते विद्वान् जनः कुलीनः जनः पूर्णकुम्भेन सह तुलितः । मूढः जनः मूर्खः जनः अर्धघटेन सह तुलितः भवति । यथा सम्पूर्णः जलपूर्णः घटः शब्दं न करोति तथा विद्वान् कुलीनः जनः कारणेन विना निरर्थकं वा न जल्पति, न वदति । अन्यत्र यथा अर्धः घटः अवश्यं शब्दं करोति तथा मूर्खः जनः कारणेन विना अथवा कार्येण विना निरर्थकं जल्पति वदति इत्यर्थः ।